नोपयोगः इति स्पष्टसंक्रान्तेरेव लोकशास्त्रोपयोगः। स्पष्टसंक्रान्तिरपि द्विविधा सायनांशा निरयनांशा चेति भेदात् यदा सिद्धान्तगणनयायनांशसंस्कृतो ग्रहो राश्यन्तरं गच्छति सा सायनांशा संक्रान्तिः। यदा तु अयनांशसंस्कार-रहितः राश्यन्तरं गच्छति सा निरयनांशा संक्रान्तिरुच्यते। संक्रान्तिश्च "त्रुटेः सहस्रभागोयः स कालोऽर्कसंक्रमः" इत्युक्तसूक्ष्मकालरूपा एतच्च क्रियैव काल इति मते अन्यमते तु संक्रान्त्युपलक्षितस्तादृशसूक्ष्मकाल इति भेदः। तादृशसूक्ष्मकालस्य संक्रान्तिशब्दार्थत्वे संक्रान्तिशब्दे वक्ष्यमाणदानाद्यङ्गत्वासम्भवेन "मुख्याभावे प्रतिनिधिः शास्त्रार्थः" इति न्यायेन गौणकालस्याप्यदर्त्तव्यता स्नानाद्यङ्गत्वान्यथानुपपत्त्या च तथा कल्पात्वे स्मृत्याद्युक्तकालविशेष एव तदङ्गत्वेन कल्प्यते यथोक्तं कालमाधवीये स्नानदानाद्यङ्गभूते संक्रान्तिकाले मुख्यकल्पस्यासम्भवादनुकल्पएवादर्त्तव्यः यथाह देवलः "संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगादप्यधश्चोर्द्ध्वं त्रिंशन्नाड्यः पवित्रिताः" इति देशव्यवधानराहित्येनात्यन्तसंश्लिष्टयोः पूर्व्वोत्तरराश्योर्मध्ये सूर्य्यः पूर्वराशिं परित्यज्य यावता कालेनोत्तरराशिं प्रविशति स कालः योगदृष्टिं विना मांसदृष्ट्या दुर्लक्ष्यः अतोऽनुष्ठाने मुख्यसंक्रान्तिकालग्रहणासंभवात् संक्रान्तिसम्बन्धिनौ पूर्व्वोत्तरकालौ ग्रहीतव्यौ संक्रान्तेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशद्घटिकाः पुण्या इति सामान्यत उक्तमिति"। तत्र अचलसंक्रान्तेरिव चलसंक्रान्तेरपि पुण्यकालतास्ति यथोक्तं तत्रैव मेषादिसंक्रान्तयो यस्मिन्दिने भवन्ति तस्माद्दिनात् पूर्वेभ्य एकादशदिनेभ्यः प्राचीने दिने मेषायनमेवं वृषभायनमित्येवं तन्नामाङ्कितम्भवति तत्काले तस्मिन्नयने स्नानादिषु पुण्यकालमाह जावालिः "संक्रान्तिषु यथा कालस्तदीयेऽप्ययने तथा। अयने विंशतिः पूर्वा मकरे विंशतिः परेति" मकरव्यतिरिक्तैकादशसंक्रान्तिसम्बन्धिष्वयनेषु तत्तत्संक्रान्तिवत् पुण्यकालोऽवगन्तव्यः मकरसंक्रान्तिसम्बन्धिनि त्वयने संक्रान्तिवैलक्षण्यं, तद्यथा मकरभिन्ने प्राचीना विंशतिघटिकाः पुण्याः मकरसंक्रान्तौ तु पाश्चात्त्या विंशतिघटिकाः पुण्या इति"। न केवलमादित्यस्यैव संक्रान्तिष्वयने पुण्यकालः किन्तु सर्वेषामपि ग्रहाणां नक्षत्रराशिसंक्रमे पुण्यकालो भवति इयांस्तु विशेषोरवेरेव राशिसंक्रमे पुण्यकालः अयनसंक्रमे तु चन्द्रादीनामपि कालविशेषे पुण्यता यथाह तत्रैव ज्योतिःशास्त्रे "नक्षत्रराश्योरविसंक्रमे स्युरर्वाक् परस्तादृसचन्द्रनाड्यः पुण्यास्तथेन्दोस्त्रिधरालवैर्युता एकैव नाड़ी मुनिभिः शुभोक्ता। नाड्यश्चतस्रः सपलाः कुजस्य। बुधस्य तिस्रः पलविश्वयुक्ताः। अध्यर्द्धनाड्यः पलसप्तयुक्ता गुरोश्चतस्रः सपलाश्च शुक्रे। द्विनागनाड्यः पलसप्तयुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः। आद्यन्तमध्ये जपहोमदानं कुर्वन्नवाप्नोति सुरेन्द्रधामेति"। अयमर्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक् परतश्च षोडश घटिकाः पुण्यकालः तथा चन्द्रस्यापि घटिकैका पलानि च त्रयोदशार्वाक्परतश्च पुण्यकालः। एवं मङ्गलस्य चतस्रो घटिकाः पलमेकं च पुण्यकालः तथा बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि च पुण्यकालः वृहस्पतेरपि सार्द्धचतस्रो घटिकाः सप्त पलानि च पुण्यकालः। शुक्रस्य चतस्रो घटिकाः पलमेकञ्च पुण्यकालः शनैश्चरस्य द्व्यशीतिघटिकाः पलानि च सप्त पुण्यकालः। पीयूषधारायां तु जैमिनिवचनत्वेन एतद्वचनमुपन्यस्तम्। मेषायनादिषु संक्रान्तिस्फुटीकरणञ्च मुहूर्त्तचिन्तामणौ "तथायनांशाः खरसाहताश्च स्पष्टार्कगत्या विहृता दिनादि। मेषादितः प्राक् चलसंक्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते"। यथा राशिसंक्रमाः बहुपुण्यदास्तथा चलसंक्रमा अपीति द्योतनाय तथाशब्दः। अयनांशाः षष्ट्या गुण्याः स्पष्टया सूर्य्यगत्या विहृताः लब्धैर्दिनाद्यैः दिनघटीपलैः कलां कृत्वा मेषादिद्वादशराशिसंक्रमणकालात् प्राक् चलसंक्रमाश्चल-संक्रान्तयः चलसंक्रमदाने ब्राह्मणेभ्यो दक्षिणादाने जपादौ जपश्राद्धहोमादौ बहुपुण्यदा भवन्ति तदुक्तं वशिष्ठसिद्धान्ते चलसंक्रमयुङ्मासे संक्रमोयः स संक्रमः अजागलस्तन इव राशिसंक्रान्तिरुच्यते" पुलस्त्यः "अयनांशसंस्कृतोभानुर्गोले-चरति सर्वदा अमुख्या राशिसंक्रान्तिस्तुल्यः कालविधिस्तयोः। स्नानदानजपश्राद्धव्रतहोमादिकर्म्माणि यत् कृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते" इति रत्नमालायाम् "यावद्भिरंशैरयनच्युतिः स्यात्तद्भोग्यकालेन दिवाकरस्य। च्युतिर्भवेद्विष्णुपदादिकानां रहस्यमेतन्मुनिभिः प्रदिष्टमिति" अयनांशानयनञ्च अयनशब्दे दर्शितम्। तत्तद्राश्यादिमार्गेषु सूर्य्यादितेजःपुञ्जसञ्चारश्चलसंक्रमोमण्डलमध्यसंपर्कश्च राशिसंक्रम इतिविषयविवेकः तद्यथा रथ्यायां प्राक् पश्चाद्वा नीयमानस्य दीपस्याग्रे दीपप्रभा यस्मिन्प्रदेशे गच्छति तस्मिन्नेव प्रदेशे क्षणान्तरेण दीपोऽपि गच्छति एवं सर्वेषामपि ग्रहाणां चलसंक्रमा द्रष्टव्याः नन्वेवं चलसंक्रमस्य मुख्यत्वे तेनैव मानेन पञ्चाङ्गगणना स्यात् इति चेत् न अश्विन्यादिभानां विसंवादात् तथाहि सूर्य्याक्रान्तराशितश्चतुर्द्दशनक्षत्रस्यैव सन्ध्याकाले प्रथममुदयोज्योतिषे प्रसिद्धः सर्वसम्मतश्च। तत्र